॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ४९

ततो रामो महातेजा धनुरादाय वीर्यवान् ।
किरीटिनं महाकायं कुम्भकर्णं ददर्श ह ॥ १॥

तं दृष्ट्वा राक्षसश्रेष्ठं पर्वताकारदर्शनम् ।
क्रममाणमिवाकाशं पुरा नारायणं प्रभुम् ॥ २॥

सतोयाम्बुदसङ्काशं काञ्चनाङ्गदभूषणम् ।
दृष्ट्वा पुनः प्रदुद्राव वानराणां महाचमूः ॥ ३॥

विद्युतां वाहिनीं दृष्ट्वा वर्धमानं च राक्षसं ।
सविस्मयमिदं रामो विभीषणमुवाच ह ॥ ४॥

कोऽसौ पर्वतसङ्काशः किरीटी हरिलोचनः ।
लङ्कायां दृश्यते वीरः सविद्युदिव तोयदः ॥ ५॥

पृथिव्याः केतुभूतोऽसौ महानेकोऽत्र दृश्यते ।
यं दृष्ट्वा वानराः सर्वे विद्रवन्ति ततस्ततः ॥ ६॥

आचक्ष्व मे महान्कोऽसौ रक्षो वा यदि वासुरः ।
न मयैवंविधं भूतं दृष्टपूर्वं कदा चन ॥ ७॥

स पृष्टो राजपुत्रेण रामेणाक्लिष्टकारिणा ।
विभीषणो महाप्राज्ञः काकुत्स्थमिदमब्रवीत् ॥ ८॥

येन वैवस्वतो युद्धे वासवश्च पराजितः ।
सैष विश्रवसः पुत्रः कुम्भकर्णः प्रतापवान् ॥ ९॥

एतेन देवा युधि दानवाश् च
यक्षा भुजङ्गाः पिशिताशनाश् च ।
गन्धर्वविद्याधरकिंनराश् च
सहस्रशो राघव सम्प्रभग्नाः ॥ १०॥

शूलपाणिं विरूपाक्षं कुम्भकर्णं महाबलम् ।
हन्तुं न शेकुस्त्रिदशाः कालोऽयमिति मोहिताः ॥ ११॥

प्रकृत्या ह्येष तेजस्वी कुम्भकर्णो महाबलः ।
अन्येषां राक्षसेन्द्राणां वरदानकृतं बलम् ॥ १२॥

एतेन जातमात्रेण क्षुधार्तेन महात्मना ।
भक्षितानि सहस्राणि सत्त्वानां सुबहून्यपि ॥ १३॥

तेषु सम्भक्ष्यमाणेषु प्रजा भयनिपीडिताः ।
यान्ति स्म शरणं शक्रं तमप्यर्थं न्यवेदयन् ॥ १४॥

स कुम्भकर्णं कुपितो महेन्द्रो
जघान वज्रेण शितेन वज्री ।
स शक्रवज्राभिहतो महात्मा
चचाल कोपाच्च भृशं ननाद ॥ १५॥

तस्य नानद्यमानस्य कुम्भकर्णस्य धीमतः ।
श्रुत्वा निनादं वित्रस्ता भूयो भूमिर्वितत्रसे ॥ १६॥

ततः कोपान्महेन्द्रस्य कुम्भकर्णो महाबलः ।
विकृष्यैरावताद्दन्तं जघानोरसि वासवम् ॥ १७॥

कुम्भकर्णप्रहारार्तो विचचाल स वासवः ।
ततो विषेदुः सहसा देवब्रह्मर्षिदानवाः ॥ १८॥

प्रजाभिः सह शक्रश्च ययौ स्थानं स्वयम्भुवः ।
कुम्भकर्णस्य दौरात्म्यं शशंसुस्ते प्रजापतेः ।
प्रजानां भक्षणं चापि देवानां चापि धर्षणम् ॥ १९॥

एवं प्रजा यदि त्वेष भक्षयिष्यति नित्यशः ।
अचिरेणैव कालेन शून्यो लोको भविष्यति ॥ २०॥

वासवस्य वचः श्रुत्वा सर्वलोकपितामहः ।
रक्षांस्यावाहयामास कुम्भकर्णं ददर्श ह ॥ २१॥

कुम्भकर्णं समीक्ष्यैव वितत्रास प्रजापतिः ।
दृष्ट्वा निश्वस्य चैवेदं स्वयम्भूरिदमब्रवीत् ॥ २२॥

ध्रुवं लोकविनाशाय पौरस्त्येनासि निर्मितः ।
तस्मात्त्वमद्य प्रभृति मृतकल्पः शयिष्यसि ।
ब्रह्मशापाभिभूतोऽथ निपपाताग्रतः प्रभोः ॥ २३॥

ततः परमसम्भ्रान्तो रावणो वाक्यमब्रवीत् ।

विवृद्धः काञ्चनो वृक्षः फलकाले निकृत्यते ॥ २४ ॥

न नप्तारं स्वकं न्याय्यं शप्तुमेवं प्रजापते ।
न मिथ्यावचनश्च त्वं स्वप्स्यत्येष न संशयः ।
कालस्तु क्रियतामस्य शयने जागरे तथा ॥ २५ ॥

रावणस्य वचः श्रुत्वा स्वयम्भूरिदमब्रवीत् ।
शयिता ह्येष षण्मासानेकाहं जागरिष्यति ॥ २६ ॥

एकेनाह्ना त्वसौ वीरश्चरन्भूमिं बुभुक्षितः ।
व्यात्तास्यो भक्षयेल्लोकान्सङ्क्रुद्ध इव पावकः ॥ २७ ॥

सोऽसौ व्यसनमापन्नः कुम्भकर्णमबोधयत् ।
त्वत्पराक्रमभीतश्च राजा सम्प्रति रावणः ॥ २८ ॥

स एष निर्गतो वीरः शिबिराज्ञीमविक्रमः ।
वानरान्भृशसङ्क्रुद्धो भक्षयन्परिधावति ॥ २९ ॥

कुम्भकर्णं समीक्ष्यैव हरयो विप्रदुद्रुवुः ।
कथमेनं रणे क्रुद्धं वारयिष्यन्ति वानराः ॥ ३० ॥

उच्यन्तां वानराः सर्वे यन्त्रमेतत्समुच्छ्रितम् ।
इति विज्ञाय हरयो भविष्यन्तीह निर्भयाः ॥ ३१ ॥

विभीषणवचः श्रुत्वा हेतुमत्सुमुखोद्गतम् ।
उवाच राघवो वाक्यं नीलं सेनापतिं तदा ॥ ३२ ॥

गच्छ सैन्यानि सर्वाणि व्यूह्य तिष्ठस्व पावके ।
द्वाराण्यादाय लङ्कायाश्चर्याश्चाप्यथ सङ्क्रमान् ॥ ३३ ॥

शैलशृङ्गाणि वृक्षांश्च शिलाश्चाप्युपसंहरन् ।
तिष्ठन्तु वानराः सर्वे सायुधाः शैलपाणयः ॥ ३४ ॥

राघवेण समादिष्टो नीलो हरिचमूपतिः ।
शशास वानरानीकं यथावत्कपिकुञ्जरः ॥ ३५ ॥

ततो गवाक्षः शरभो हनुमानङ्गदो नलः ।
शैलशृङ्गाणि शैलाभा गृहीत्वा द्वारमभ्ययुः ॥ ३६ ॥

ततो हरीणां तदनीकमुग्रं
रराज शैलोद्यतवृक्षहस्तम् ।
गिरेः समीपानुगतं यथैव
महन्महाम्भोधरजालमुग्रम् ॥ ३७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com